2026

UGVYDS603

लघुशब्देन्दुशेखरः - 1

तृतीयपत्रम्

पूर्णाङ्काः – 60

समयः– सार्धहोराद्वयम्

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम्। 1×10 =10

1. नागेशभट्टस्य मातुर्नाम किमासीत् ?
2. लघुशब्देन्दुशेखरः इति कस्य ग्रन्थस्य व्याख्यानं वर्तते ?
3. आदेः परस्येति सूत्रं कस्यापवादः?
4. अनेकाल्शित्सर्वस्य इत्यत्र शित उदाहरणं किम् ?
5. विभाषासंज्ञाविधायकं सूत्रं किम् ?
6. अनचि च, इत्यत्र च इत्यस्य कोऽर्थः?
7. एकः पूर्वपरयोः इति किदृशं सूत्रम् ?
8. ब्रह्मर्षिः इत्यत्र कः सन्धिः ?
9. वृद्धिरादैच् इत्यत्र वृद्धिशब्दस्य कोऽर्थः?
10. एत्येधत्यूठ्सु इति सूत्रस्य पदविभाजनं करोतु।

अधस्तनेषु पञ्चप्रश्नाः समाधेयाः । 6×5 = 30

11. 'अइउण्' इत्यादिप्रत्याहारसूत्रेषु सन्ध्यभावं नागेशदिशोपपादयत।
12. आद्यन्तौ टकितौ, इति सूत्रं व्याकुर्वन्तु।
13. 'अदर्शनं लोपः' इति सूत्रस्य व्याख्याने समागतस्य प्रसक्तस्य इति पदस्य ग्रहणं किमर्थम्।
14. एङः पदान्तादति इति सूत्रे पदान्तात्किमर्थम्।
15. शेखरकारदिशा 'अणुदित्सवर्णस्ये 'ति सूत्रं व्याकुर्वन्तु।
16. स्थानेऽन्तरतमः इति सूत्रस्य वाक्यभेदं प्रदर्श्य नागेशमतं प्रस्तूयताम्।
17. 'निपात एकाजि'ति सूत्रं सपदकृत्यं व्याकुर्वन्तु।

अधस्तनेषु प्रश्नेषु द्वौ समाधेयौ। 10×2=20

18. नृत्तावसानेनटराज..... इत्यादि कारिकां सम्पूर्णं विलिख्य वर्णयत।
19. 'इको गुणवृद्धी' इति सूत्रं व्याख्यायताम् ।
20. इको यणचि, इति सूत्रे जातिव्यक्तिपक्षं नागेशदिशा वर्णयत।
21. प्रत्यभिवादेऽशूद्रे, इति प्रत्यभिवादार्थं प्रतिपाद्य अशूद्रे इति ग्रहणस्य प्रयोजनम् उपस्थाप्य नागेशदिशा व्याकुर्वन्तु।

****